CAREERINDIA

# आदर्श-प्रश्नपत्रम् - 2020-21
## कक्षा - दशमी
## संस्कृतम् (कोड-122)

**समयः – होरात्रयम्** **सम्पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः –**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रश्नाः सन्ति।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम् –**

| | | |
|---|---|---|
| **'अ' - भागः** | **(बहुविकल्पात्मकः)** | **40 अङ्काः** |
| **'आ' - भागः** | **(वर्णनात्मकः)** | **40 अङ्काः** |

(i) अस्मिन् प्रश्नपत्रे द्वौ भागौ स्तः।

(ii) 'अ' - भागः बहुविकल्पात्मकः अस्ति।

(iii) 'आ' - भागः वर्णनात्मकः अस्ति।

(iv) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(v) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(vi) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

www.careerindia.com

CAREERINDIA

## 'अ' - भागः 40 अङ्काः

## (बहुविकल्पात्मकाः प्रश्नाः)

| | अनुप्रयुक्त-व्याकरणम् | |
|---|---|---|
| 1. | अधोलिखितवाक्येषु रेखाङ्कितपदस्य सन्धिपदं सन्धिच्छेदपदं वा चिनुत - (केवलं प्रश्नचतुष्टयम्)<br>(i) **<u>अचिरादेव</u>** चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत।<br>(क) अचिराद् + एव (ख) अचिरात् + एव (ग) अचिराद + एव<br>(ii) आलस्यं हि मनुष्याणां **<u>शरीरस्थः + महान्</u>** रिपुः।<br>(क) शरीरस्थो महान् (ख) शरीरस्थ महान् (ग) शरीरस्थमहान्<br>(iii) **<u>कश्चित्</u>** कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन् आसीत्।<br>(क) कश् + चित् (ख) क + श्चित् (ग) कः + चित्<br>(iv) किञ्चित् कालं नय माम् **<u>अस्मात् + नगराद्</u>** बहुदूरम् ।<br>(क) अस्मात्नगरात् (ख) अस्मान्नगरात् (ग) अस्मादनगरात्<br>(v) अयोग्यः पुरुषः नास्ति **<u>योजकः + तत्र</u>** दुर्लभः।<br>(क) योजकस्तत्र (ख) योजक तत्र (ग) योजकश्तत्र | 1×4=4 |
| | | |
| 2. | अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत– (केवलं प्रश्नचतुष्टयम्)<br>(i) वानरः सिंहस्य कर्णमाकृष्य पुनः **<u>वृक्षोपरि</u>** आरोहति।<br>(क) वृक्ष उपरि (ख) वृक्षस्य उपरि (ग) वृक्षे उपरि<br>(ii) प्रकृतिमाता (**<u>सस्नेहम्</u>**) – भोः भोः प्राणिनः! यूयं सर्वे एव मे सन्ततिः।<br>(क) स्नेहस्य सहितम् (ख) स्नेहेन सहितम् (ग) स्नेहस्य अभावः<br>(iii) सर्वेषामेव मत्कृते महत्त्वं विद्यते **<u>समयम् अनतिक्रम्य</u>**।<br>(क) यथासमयम् (ख) यथासमयः (ग) उपसमयम्<br>(iv) **<u>वाक्पटुः</u>** केनापि प्रकारेण परैर्न परिभूयते।<br>(क) वाचः पटुः (ख) वाक् पटुः (ग) वाचि पटुः<br>(v) **<u>हयाः च नागाः च</u>** वहन्ति बोधिताः।<br>(क) हयनागाः (ख) हयानागौ (ग) हयानागाश्च | 1×4=4 |
| | | |
| 3. | अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्) | 1×4=4 |

www.careerindia.com

| | | |
|---|---|---|
| | (i) विद्वांसः एव लोकेऽस्मिन् **चक्षुष्मन्तः** प्रकीर्तिताः।<br>(क) चक्षुस् + मतुप् (ख) चक्षुष् + मतुप् (ग) चक्षुः+ मतुप्<br>(ii) **विचित्रा** दैवगतिः।<br>(क) विचित्र + टाप् (ख) विचित्र + ङीप् (ग) विचित्र + त्व<br>अथवा<br>जम्बुकः – स्वामिन् ! यत्रास्ते सा **धूर्ता** तत्र गम्यताम्।<br>(क) धूर्त + तल् (ख) धूर्त + टाप् (ग) धूर्त + त्व<br>(iii) तस्य भार्या **बुद्धि + मतुप्** पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।<br>(क) बुद्धिमान् (ख) बुद्धिमती (ग) बुद्धिमत्<br>(iv) सर्वेषामेव मत्कृते **महत् + त्व** विद्यते।<br>(क) महत्ता (ख) महत्वम् (ग) महत्त्वम् | |
| | | |
| **4.** | **वाच्यस्य नियमानुगुणम् उचितं विकल्पं चिनुत। (केवलं प्रश्नत्रयम्)**<br>(i) आदित्यः – अभिनव ! किं ---------------------- क्रीडितुं गच्छसि?<br>(क) त्वया (ख) त्वम् (ग) अहम्<br>(ii) अभिनवः – न, मया तु स्वपाठः ---------------------।<br>(क) पठ्यते (ख) पठामि (ग) पठ्यसे<br>(iii) आदित्यः – शोभनम् ! त्वं -------------- अपि लिखसि किम्?<br>(क) निबन्धः (ख) निबन्धम् (ग) निबन्धेन<br>(iv) अभिनवः – न, ---------- तु गणितस्य अभ्यासः क्रियते।<br>(क) त्वया (ख) अहम् (ग) मया | 1×3=3 |
| | | |
| **5.** | **प्रदत्तेभ्यः विकल्पेभ्यः समुचितं कालबोधकशब्दं चिनुत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) अहं सायं 5:30 **वादने**----------------------- भ्रमणं करोमि।<br>(क) सार्ध-पञ्चवादने (ख) सपाद-पञ्चवादने (ग) पादोन-पञ्चवादने<br>(ii) केशवः प्रातः 6:00 **वादने** ----------------------- जागर्ति।<br>(क) सार्ध-षड्वादने (ख) सपाद-षड्वादने (ग) षड्वादने<br>(iii) कपिलः प्रातः 7:30 **वादने** ----------------------- विद्यालयं गच्छति।<br>(क) सार्ध-सप्तवादने (ख) सपाद- सप्तवादने (ग) पादोन-सप्तवादने<br>(iv) सायं 4:30 **वादने** ----------------------- निनादः अतिरिक्तकक्षायै गच्छति ।<br>(क) सपाद-चतुर्वादने (ख) सार्ध-चतुर्वादने (ग) पादोन-चतुर्वादने | 1×4=4 |

www.careerindia.com

| | | |
|---|---|---|
| | (v) प्रणवः रात्रौ 8:45 **वादने** ------------------------ दूरदर्शनं पश्यति।<br>(क) सार्ध-अष्टवादने (ख) सपाद-अष्टवादने (ग) पादोन-नववादने | |
| | | |
| 6. | वाक्यानुगुणम् उचिताव्ययपदं चिनुत - (केवलं प्रश्नत्रयम्)<br>(i) ---------- छात्राः पादपान् सिञ्चन्ति।<br>(क) श्वः (ख) ह्यः (ग) इदानीम्<br>(ii) दुर्वहम् ------------- जीवितं जातम्।<br>(क) तत्र (ख) अत्र (ग) अन्यत्र<br>(iii) निर्जनस्थाने रोदनं---------------- भवति।<br>(क) श्वः (ख) वृथा (ग) एव<br>(iv) --------------- गणितस्य परीक्षा अभवत्।<br>(क) उच्चैः (ख) शनैः (ग) ह्यः | 1×3=3 |
| | | |
| 7. | अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चिनुत- (केवलं प्रश्नत्रयम्)<br>(i) भवान् फलं **खाद**।<br>(क) खादसि (ख) खादन्तु (ग) खादतु<br>(ii) **वृक्षाणि** हरिताः सन्ति।<br>(क) वृक्षान् (ख) वृक्षाः (ग) वृक्षौ<br>(iii) सः ग्रामं **गच्छन्ति**।<br>(क) गच्छसि (ख) गच्छतः (ग) गच्छति<br>(iv) आनन्दः ह्यः न **आगमिष्यति**।<br>(क) आगच्छत् (ख) आगच्छति (ग) आगच्छन् | 1×3=3 |
| | | |
| | **पठितावबोधनम्** | |
| 8. | रेखाङ्कित-पदानि आधृत्य समुचितं प्रश्नवाचकपदं चिनुत- (केवलं प्रश्नपञ्चकम्)<br>(i) **महानगरेषु** वाहनानाम् अनन्ताः पङ्क्तयः धावन्ति।<br>(क) कस्य (ख) कुत्र (ग) केषाम्<br>(ii) बुद्धिमती **चपेटया** पुत्रौ प्रहृतवती।<br>(क) का (ख) कदा (ग) कया<br>(iii) मयूरस्य नृत्यं **प्रकृतेः** आराधना अस्ति।<br>(क) का (ख) कस्य (ग) कस्याः | 1×5=5 |

www.careerindia.com

| | | |
|---|---|---|
| | (iv) **<u>सुराधिपः</u>** ताम् अपृच्छत् ।<br>(क) कः (ख) किम् (ग) का<br>(v) करुणापरो गृही **<u>तस्मै</u>** आश्रयं प्रायच्छत्।<br>(क) कस्मै (ख) कस्यै (ग) कैः<br>(vi) संसारे **<u>विद्वांसः</u>** ज्ञानचक्षुभिः नेत्रवन्तः कथ्यन्ते।<br>(क) काः (ख) के (ग) कः | |
| | | |
| 9. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम् उचितार्थं चिनुत-**<br>**(केवलं प्रश्नचतुष्टयम्)**<br>(i) नवमालिका **<u>रसालं</u>** मिलिता।<br>(क) वनम् (ख) आम्रम् (ग) वृक्षम्<br>(ii) राजपुत्रस्य **<u>भार्या</u>** पुत्रद्वयोपेता पितृगृहं प्रति चलिता।<br>(क) माता (ख) सखी (ग) पत्नी<br>(iii) वृषः **<u>जवेन</u>** गन्तुम् अशक्तः आसीत्।<br>(क) तीव्रगत्या (ख) 'जव' इति अन्नेन (ग) मन्दं मन्दम्<br>(iv) **<u>करी</u>** च सिंहस्य बलं जानाति।<br>(क) करः (ख) सिंहः (ग) गजः<br>(v) मां निजगले बद्ध्वा चल **<u>सत्वरम्</u>**।<br>(क) मन्दम् (ख) शीघ्रम् (ग) शनैः | 1×4=4 |
| | | |
| 10. | **भाषिककार्यसम्बद्धानां प्रश्नानां समुचितम् उत्तरं विकल्पेभ्यः चिनुत –**<br>**(केवलं प्रश्नषट्कम्)**<br>(i) "दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम्" अस्मिन् वाक्ये विशेष्यपदं किम्?<br>(क) दुर्दान्तैः (ख) दशनैः (ग) अमुना<br>(ii) "मार्गे गहनकानने एकं व्याघ्रं ददर्श' अत्र 'वने' इत्यर्थे किं पर्यायपदं प्रयुक्तम्?<br>(क) मार्गे (ख) गहने (ग) कानने<br>(iii) "सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात" अत्र क्रियापदं किम्?<br>(क) पपात (ख) ऊढ्वा (ग) अशक्तः<br>(iv) "निमित्तमुद्दिश्य हि यः प्रकुप्यति, ध्रुवं स तस्यापगमे प्रसीदति" अस्मिन् वाक्ये 'प्रकुप्यति' इत्यस्य किं विलोमपदं प्रयुक्तम्?<br>(क) ध्रुवम् (ख) प्रसीदति (ग) निमित्तम् | 1×6=6 |

CAREERINDIA

| | | |
|---|---|---|
| | (v) "क्रुद्धः सिंहः वानरं प्रहर्तुमिच्छति" अस्मिन् वाक्ये किं विशेषणपदं प्रयुक्तम्?<br>(क) क्रुद्धः (ख) सिंहः (ग) वानरम्<br>(vi) ''आदेशं प्राप्य उभौ प्राचलताम्" अत्र कर्तृपदं किम्?<br>(क) आदेशम् (ख) उभौ (ग) प्राप्य<br>(vii) "पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्" अत्र विशेषणपदं किम्?<br>(क) पिता (ख) महत् (ग) विद्याधनम्<br>(viii) "तस्य मृतशरीरं राजमार्गं निकषा वर्तते" अत्र 'निकटे' इत्यर्थे किं पदं दत्तम्?<br>(क) राजमार्गम् (ख) मृतशरीरम् (ग) निकषा | |

## 'आ' - भागः

### वर्णनात्मकाः प्रश्नाः 40 अङ्काः


| अपठितावबोधनम् | | |
|---|---|---|
| 11. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>सूर्यवंशे सर्वप्रथमं मनुर्नाम नृपः अभवत्। तस्य कुले एव दिलीपः इति ख्यातनामा राजा समुत्पन्नः। राजा दिलीपः सर्वेषां विषयाणां ज्ञाता आसीत् तथापि सः सर्वदा अभिमानरहितः, पराक्रमी, परिश्रमी, क्षमाशीलः आसीत्। दिलीपः न्यायपूर्वकं पितृवत् च प्रजापालनं करोति स्म। सः प्रजायाः रक्षणे सर्वदा उद्यतः भवति स्म। अतः सः एव प्रजायाः पिता आसीत्। राजा दिलीपः यदा चिरं सन्ततिं न अलभत तदा तं गुरुवशिष्ठः सन्ततिं प्राप्तुं कामधेनोः पुत्र्याः नन्दिन्याः सेवार्थम् आदिशत्। दिलीपः स्वभार्यया सह एकविंशतिः दिवसपर्यन्तं गोसेवाम् अकरोत्। द्वाविंशतितमे दिने एकः सिंहः नन्दिनीम् आक्राम्यत्। दिलीपः गोरक्षायै स्वशरीरं समर्पयितुम् उद्यतः अभवत्। प्रसन्ना नन्दिनी तस्मै सन्ततेः वरम् अयच्छत्। | 10 |
| | **अ एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) दिलीपः कया सह गोसेवाम् अकरोत्?<br>(ii) दिलीपः किमर्थं स्वशरीरं समर्पयितुम् उद्यतः अभवत्?<br>(iii) सूर्यवंशे सर्वप्रथमं कः नृपः अभवत्? | (1×2=2) |
| | **आ पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)**<br>(i) गुरुवशिष्ठः किमर्थं नन्दिन्याः सेवार्थम् आदिशत्?<br>(ii) दिलीपः कथं प्रजापालनं करोति स्म?<br>(iii) दिलीपः कति दिवसपर्यन्तं गोसेवाम् अकरोत्? | (2×2=4) |
| | **इ अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** | (1) |
| | **ई यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)** | (1×3=3) |

www.careerindia.com

| | | | |
|---|---|---|---|
| | **(i) 'आक्राम्यत्' इत्यस्याः क्रियायाः कर्तृपदं किम्?**<br>(क) दिलीपः (ख) वशिष्ठः (ग) सिंहः<br>**(ii) 'क्षमाशीलः' इति पदस्य विशेष्यं गद्यांशात् चित्वा लिखत।**<br>(क) वशिष्ठः (ख) दिलीपः (ग) पराक्रमी<br>**(iii) 'वंशे' इत्यस्य पदस्य कः पर्यायः अत्र आगतः?**<br>(क) कुले (ख) सन्ततेः (ग) चिरम्<br>**(iv) अनुच्छेदे 'अलसः' पदस्य कः विपर्ययः आगतः?**<br>(क) क्षमाशीलः (ख) परिश्रमी (ग) पराक्रमी | |
| | | |
| | **रचनात्मकं कार्यम्** | |
| 12. | **भवान् अभिनवः। भवान् पितुः स्थानान्तरणवशात् असमप्रदेशम् आगतः। स्थानान्तरण-प्रमाणपत्रं प्राप्तुं प्रधानाचार्यां प्रति लिखिते प्रार्थनापत्रे रिक्तस्थानानि पूरयित्वा पत्रं च पुनः उत्तरपुस्तिकायां लिखतु।**<br><br>सेवायाम्<br><br>माननीया (i) -----------------<br>डी.ए.वी. विद्यालयः,<br>नवदेहली।<br><br>विषयः - स्थानान्तरण-प्रमाणपत्रं प्राप्तुं प्रार्थनापत्रम्।<br><br>महोदये !<br>(ii) ---------------------- निवेदनम् अस्ति यद् अहं भवत्याः विद्यालये नवमकक्षायां (iii) -------------------। मम पितुः (iv) -------------- असमप्रदेशस्य गौहाटीनगरे सञ्जातम्। मम सम्पूर्णः परिवारः तत्रैव गत्वा निवासं(v) ---------------। अहम् अपि (vi) ---------------- सह गत्वा तत्रैव (vii) --------------------। अतः अहं प्रार्थये यत् कृपया मह्यं स्थानान्तरणपत्रं (viii)---------------------- अनुगृह्णातु। भवत्याः (ix) ---------------- कृपा भविष्यति। धन्यवादः।<br><br>भवत्याः (x) --------------- शिष्यः<br>अभिनवः<br>नवमकक्षास्थः<br>अनुक्रमाङ्कः:- 3<br>दिनाङ्कः ------------ | ½×10=5 |

www.careerindia.com

CAREERINDIA

| | | |
|---|---|---|
| | **मञ्जूषा**<br>सविनयम्, पठामि, प्रधानाचार्या, परिवारेण, करिष्यति, प्रदाय, स्थानान्तरणम्, पठिष्यामि, महती, आज्ञाकारी। | |
| | | |
| 13. | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत –**<br><br>**मञ्जूषा –**<br>अग्रजस्य, अनुजस्य, भगिनी, रक्षाबन्धनम्, रक्षासूत्रम्, मणिबन्धे, मिष्टान्नम्, प्रसन्नौ, पर्वणः, बध्नाति।<br>**अथवा**<br>**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -**<br>**"दीपावलिः"**<br>मञ्जूषा –<br>दीपानां पङ्क्तिः, जनाः, रात्रौ, पूजयन्ति, प्रतीकम्, मिष्टान्नम्, वितरन्ति, स्फोटयन्ति, दीपमालिकोत्सवः, उल्लासमयम्, अमावस्यायाम्, उत्साहेन, बालकाः अपि। | 1x5=5<br><br>1x5=5 |
| | | |
| 14. | **अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत – (केवलं वाक्यपञ्चकम्)**<br>1. उद्यान में फूल खिल रहे हैं। — 1. Flowers are blooming in the garden.<br>2. मेरे पास पाँच फल हैं। — 2. I have five fruits.<br>3. दिल्ली भारत की राजधानी है। — 3. Delhi is the capital of India.<br>4. कल हम दोनों गोवा गए थे। — 4.Both of us went to Goa yesterday. | 1x5=5 |

www.careerindia

CAREERINDIA

| | | |
|---|---|---|
| | 5. कृपया तुम मेरे लिए पानी लाओ। 5. Please bring water for me.<br>6.शनिवार को मैं उत्सव में जाऊँगा। 6. I will go to festival on Saturday.<br>7. अब तुम्हें पढ़ना चाहिए। 7. You should study now. | |
| | | |
| | **पठितावबोधनम्** | |
| 15. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा बुद्धिमती एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद- "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते"। इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) कः भयाकुलचित्तो नष्टः?<br>(ख) सा बुद्धिमती कुत्र एकं व्याघ्रं ददर्श?<br>(ग) राजसिंहः कः आसीत्?<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) सा पुत्रौ चपेटया प्रहृत्य किं जगाद?<br>(ख) बुद्धिमती सा किमर्थं पितुर्गृहं प्रति चलिता?<br>(ग) मार्गे सा बुद्धिमती किं ददर्श? | 3<br><br><br><br><br><br><br>(½×2=1)<br><br><br><br>(1×2=2) |
| | | |
| 16. | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>**दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम्।**<br>**शुचि पर्यावरणम्॥**<br>**महानगरमध्ये चलदनिशं कालायसचक्रम्।**<br>**मनः शोषयत् तनुः पेषयद् भ्रमति सदा वक्रम्॥**<br>**दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम्। शुचि पर्यावरणम्॥**<br><br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) अत्र किं दुर्वहं जातम्?<br>(ii) कदा महानगरे कालायसचक्रं चलति?<br>(iii) पर्यावरणं कीदृशं भवितव्यम्? | 3<br><br><br><br><br><br><br><br>(½×2=1) |

www.careerindia.com

| | | |
|---|---|---|
| | **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) कालायसचक्रं किं कुर्वत् वक्रं भ्रमति?<br>(ख) केन जनग्रसनं न स्यात्?<br>(ग) का अस्माकं शरणम् अस्ति? | (1×2=2) |
| | | |
| 17. | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>**मयूरः** - (वृक्षोपरितः – साट्टहासपूर्वकम्) विरम, विरम, आत्मश्लाघायाः। किं न जानासि यत् –<br>**यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजा।**<br>**अकर्णधारा जलधौ विप्लवेतेह नौरिव॥**<br>को न जानाति तव ध्यानावस्थाम्। 'स्थितप्रज्ञ' इति व्याजेन वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि। धिक् त्वाम्। तव कारणात् तु सर्वं पक्षिकुलमेवावमानितं जातम्।<br>**वानरः** - (सगर्वम्) अतएव कथयामि यत् अहमेव योग्यः वनराजपदाय। शीघ्रमेव मम राज्याभिषेकाय तत्पराः भवन्तु सर्वे वन्यजीवाः।<br>**मयूरः** - अरे वानर! तूष्णीं भव। कथं त्वं योग्यः वनराजपदाय? पश्यतु पश्यतु मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एवाहं पक्षिराजः कृतः अतः वने निवसन्तं मां वनराजरूपेणापि द्रष्टुं सज्जाः भवन्तु अधुना।यतः कोऽप्यन्यः विधातुः निर्णयम् अन्यथा कर्तुं क्षमः?<br>**काकः** - (सव्यङ्ग्यम्) अरे अहिभुक्! नृत्यातिरिक्तं का तव विशेषता यत् त्वां वनराजपदाय योग्यं मन्यामहे वयम्।<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) कः सगर्वं वदति?<br>(ख) नाट्यांशे कः श्लोकं वदति?<br>(ग) 'अरे वानर! तूष्णीं भव।' इति कः कथयति?<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) विधात्रा मयूरः कथं पक्षिराजः कृतः?<br>(ख) काकः किं वदति?<br>(ग) वानरः (सगर्वं) किं वदति? | 3<br><br><br><br><br><br><br><br><br><br><br><br><br><br><br><br>(½×2=1)<br><br><br><br>(1×2=2) |
| | | |
| 18. | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत –**<br>**त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।**<br>**परित्यज्य फलं पक्कं भुङ्क्तेऽपक्वं विमूढधीः॥** | ½×4=2 |

www.careerindia.com

CAREERINDIA

| | | |
|---|---|---|
| | **अन्वयः** – यः (i) ................वाचम् त्यक्त्वा परुषाम् वाचम् (ii) ………….. (सः) विमूढधीः पक्वम् (फलम्) (iii)...........अपक्वम् फलम् (iv)……….।<br>**मञ्जूषा-**<br>अभ्युदीरयेत्, भुङ्क्ते, धर्मप्रदाम्, परित्यज्य<br>**अथवा**<br>**मञ्जूषायाः साहाय्येन श्लोकस्यभावार्थे रिक्तस्थानानि पूरयित्वा पुनःलिखत** -<br>**काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।**<br>**वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ॥**<br>**भावार्थः** –<br>अस्य भावोऽस्ति यत् ----------------- वर्णः कृष्णः वर्तते पिकस्य अपि वर्णः ------------------- एव अस्ति। अतः पिके काके च कः भेदः अस्ति अर्थात् वर्णदृष्ट्या तयोः कश्चिद् भेदो न दृश्यते। परन्तु यदा --------------- समयः आगच्छति तदा तयोः स्वरैः ज्ञायते यत् कः ------------------- अस्ति कश्च पिको वर्तते।<br>**मञ्जूषा-**<br>वसन्तस्य, काकस्य, काकः, कृष्णः | ½×4=2 |
| | | |
| 19. | **अधोलिखित-कथांशं समुचित-क्रमेण लिखत –**<br>(i) एकः कृषकः आसीत्।<br>(ii) पुत्रस्य दैन्यावस्थां दृष्ट्वा सुरभिः दुःखिता अभवत्।<br>(iii) सुरभेः इमाम् अवस्थां दृष्ट्वा सुराधिपः ताम् अपृच्छत् – 'अयि शुभे! किमेवं रोदिषि' इति।<br>(iv) कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत।<br>(v) तस्य समीपे द्वौ बलीवर्दौ आस्ताम्।<br>(vi) क्रुद्धः कृषकः तमुत्थापयितुं बहुवारं यत्नमकरोत्।<br>(vii) सः वृषभः हलम् ऊढ्वा गन्तुम् अशक्तः क्षेत्रे पपात।<br>(viii) तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः आसीत्। | ½x8=4 |

-------------0000-------------

www.careerindia.com